International Journal of Sanskrit Research 2019; 5(6): 151-154

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(6): 151-154
© 2019 IJSR
www.anantaajournal.com
Received: 16-09-2019
Accepted: 18-10-2019

**अनुप बाइल**
शिक्षाशास्त्रीविभागः
राष्ट्रियसंस्कृतसंस्थानम्,
श्रीसदाशिवपरिसरः, पुरी, ओडिशा, भारत

**Corresponding Author:**
**अनुप बाइल**
शिक्षाशास्त्रीविभागः
राष्ट्रियसंस्कृतसंस्थानम्,
श्रीसदाशिवपरिसरः, पुरी, ओडिशा, भारत

# स्नातकस्तरे व्यवसायिकनिर्देशनस्य महत्वम्

**अनुप बाइल**

**सारांश**
साम्प्रतं महती उद्योगसमस्या सर्वत्र दरीदृश्यते। सर्वे चिन्तयन्ति यत् आत्मन: भविष्यजीवनं कथञ्चित् सुन्दरं सुखमयं च स्यात्। तदर्थं सुयोग्यनिर्देशनस्य अपेक्षा वर्तते। व्यवसायिकनिर्देशनकर्मणि य: निस्नात: तस्मात् व्यवसायिकनिर्देशनं ग्रहणीयम्। व्यक्ते: सामर्थ्य इच्छानुगुणं निर्देशनं दद्यात्। आधुनिकयुगे बहवः जना: शिक्षिता: सन्तोऽपि आजीविका प्राप्तये असमर्था: दरीदृश्यन्ते। समाजस्य औद्योगिकसंस्थानाञ्च आवश्यकतानां पूर्तये अशक्ता: भवन्ति। शैक्षिकसंस्थासु छात्रेभ्य: विभिन्न-व्यवसायानां ज्ञानप्रदानम्, आत्मन: सामर्थ्यानुसारं योग्यव्यवसायचयनम्, चितव्यवसायाय योग्यप्रशिक्षणप्रदानम् इत्यादिकार्येषु क्रियमाणसाहाय्यम् उक्तसमस्यानां समाधानाय मार्गं भवितुमर्हति।
जनविस्फोटः, सर्वकारस्य जीविकां प्रति यथार्थचिन्तनस्य अभाव:, अवैज्ञानिकी शिक्षाव्यवस्था, यथार्थनिर्देशकस्य अभावः, यथार्थव्यवसायिकनिर्देशनस्य अभाव: जीविकासमस्याया: कारणम्। एतादृशी समस्या निराकरणाय व्यवसायिकनिर्देशनस्य अपेक्षा वर्तते।

**कुट शब्द:** स्नातकस्तरे, व्यवसायिकनिर्देशनस्य

## प्रस्तावना
प्रत्येकं मनुष्यस्य समस्यायाः कारणानि च विभिन्नानि सन्ति। यथा- शैक्षिकसमस्या, वैयक्तिकसमस्या, स्वास्थ्यसम्बन्धीयसमस्या, नागरिकता-सामाजिक-नैतिकसमस्या, परिवारसम्बन्धीयसमस्या, धर्मसम्बन्धीयसमस्या, व्यावसायिकसमस्या इत्यादयः। एतासु समस्यासु व्यावसायिकसमस्या भिन्ना भवति। स्नातकस्तरस्य शिक्षार्थिणः स्नातककक्षा उत्तीर्ण्य वृत्तिचयनविषये चिन्तयन्ति। विषयेऽस्मिन् तेषां सम्यक् धारणा नास्ति। स्नातकस्तरे पठनवेलायां शिक्षार्थीनां विविधैः तथ्यैः प्रयोजनमस्ति।

यथा-कः व्यावसायः छात्रस्य कृते यथोपयुक्तः?व्यावसायेषु कीदृशं सामर्थ्यं, दक्षतां च अपेक्षते ? व्यावसायस्य कृते यथार्थतथ्यसम्प्रसारणं कुत्र प्राप्यते ? कर्मक्षेत्रे सहकर्मिना सह कथं सुसम्बन्धं स्थापयितुं शक्यते ? अस्यां स्थितौ व्यवसायिकनिर्देशनं नितरामावश्यकमस्ति। व्यवसायिकनिर्देशनकर्मणि यः निस्नातः तस्मात् व्यवसायिकनिर्देशनं ग्रहणीयम्। व्यक्तेः सामर्थ्य इच्छानुगुणं निर्देशनं दद्यात्। व्यवसायिकनिर्देशनं व्यक्तेः व्यवसाचयने, निर्माणे, योगदाने, उन्नतौ च साहाय्यदानस्य प्रक्रिया भवति। निर्देशनमेतत् भविष्यव्यवसायसम्बन्धे परिकल्पनाकरने एवञ्च व्यवसायेन सह सार्थकसमायोजने विशेषप्रयोजनमस्ति।

व्यावसायिकनिर्देशनस्य परिभाषाः

नेशनल वोकेशनल गाइदेन्स एसोसिएशन्(१९२४)[1] अनया संस्थया स्वप्रतिवेदने इयं परिभाषा प्रस्तुता- व्यावसायिक-निर्देशनं सा प्रक्रिया वर्तते, यस्यां व्यावसायचयनाय विकासाय च, व्यवसाये प्रवेशाय, तस्मिन् साफल्यमवाप्तुञ्च सूचनाः, अनुभवाः, परामर्शाश्च प्रदीयन्ते।

'Vocational Guidance is the giving of information, experience and advice in regard of choosing an occupation, Preparing for it, entering it and Progressing in it.'

'अन्ताराष्ट्रिय-श्रम-संगठनम्'(ILO-१९४९)[2] इत्यस्यानुसारेण व्यावसायिकनिर्देशनं मानवेभ्यः प्रदीयमानं तत्साहाय्यं वर्तते, यत्तेषां गुणानाम्, अवसराणाञ्चाधारेण व्यावसायचयने प्रगतौ समस्यासमाधाने च प्रदीयेते। "Vocational Guidance in the assistance given to individual in solving Problems related to occupational choice and Progress with due regard for the indivual characteristics and their relation to occupational Opportunity.''

गिवसन्- मिचेलः महोदयौ व्यवसायिकनिर्देशनविषये यथार्थमुक्तम्- विद्यालयपरिवेशे व्यवसायिकानिर्देशेनमेका सततविकाशशीला प्रक्रिया इति। एषा प्रक्रिया शिक्षार्थी सक्रियपाठक्रमेण तस्य कर्मजीवनस्य परिकल्पनाकरणे, सिद्धान्तग्रहणे, सामञ्जस्यविधाने च दक्षतामयितुं साहाय्यं करोति। एवञ्च समुचितं निर्देशनं शिक्षार्थीनां विकासे आत्मपलब्धौ च साहाय्यं करोति।

व्यवसायिकनिर्देशनस्य उद्देश्यम्-

(१) व्यक्तेः रूच्यनुसारेण व्यवसायस्य वैशिष्ट्यम्, कर्मणः प्रकृतिः, दायित्वम्, पुरस्कारः प्रभृतिसम्बन्धे ज्ञानार्जनाय साहाय्यप्रदानम्।
(२) व्यक्तेः आत्मनः शक्ति-सामर्थ्य-योग्यता अन्विष्य कार्यं प्रति आग्रहमुत्पादयितुं साहाय्यप्रदानम्।
(३) विविधशिक्षाप्रतिष्ठाने व्यवसायिकशिक्षा कदा आरभ्यते, प्रतिष्ठानं कथं भवेत्, कस्मिन् प्रतिष्ठाने व्यवसायिकशिक्षा गृह्णीयात् प्रभृति विषये शिक्षार्थीभ्यः यथार्थं ज्ञानप्रदानम्।
(४) व्यवसाये सहकर्मिना सह कथं सुष्ठुरूपेण सम्बन्धः स्थापनीयः तथा समाजेन सह कथं समायोजनं करणीयं तद्विषये सम्यक् साहाय्यप्रदानम्।
(५) यस्मिन् व्यवसाये विपदः आशङ्का अस्ति इति मन्यते तस्य व्यवसायस्य चयनस्य कृते निर्देशनं नैव दातव्यम्।
(६) वृत्तिसम्बन्धीय-सभा, कर्मशाला, आलोचनासभाः इत्यादीनाम् आयोजनं कृत्वा साहाय्यप्रदानम्।
(७) आर्थिकदृष्ट्या अनग्रसरशिक्षार्थीनां व्यवसायस्य कृते अनुदानम्, छात्रवृत्तिः, अध्येतावृत्तिः प्राप्तिविषये सूचनाप्रदानम्।
(८) मानवसम्पदः यथार्थव्यवहारे साहाय्यप्रदानमिति।
(९) कर्मक्षेत्रसमस्यां दूरीकृत्य व्यक्तेः आत्मविश्वासबर्धने साहाय्यप्रदानम्।

[1].निर्देशन एवं परामर्श के मूल तत्व-डॉ.शर्मा ए.आर., डॉ. चतुर्वेदी शिखा, मेरठ,२०१४

[2].तत्रैव

व्यावसायिक-तथ्यानां स्त्रोतांसि (Sources Career information)

विविध-विनियोगकारी-संस्थायाः[3] (Employing Authority) जनसंयोगीविभागात् व्यावसायिकतथ्यानि संग्रहयितुं शक्यते।

कर्मविनियोगकेन्द्रात् (Employment Exchange) विविधव्यावसायस्य कृते विविधपत्रिका कर्मविनियोगकेन्द्रेन प्रकाश्यते। यस्मात् व्यावसायिक-तथ्यानि प्राप्तुं शक्यते।

इदानीन्तनकाले विविधपत्रिका (Magazine), संवादपत्रस्य विज्ञापनम् (Advertisement), कर्मक्षेत्रम्, कर्मसंस्थानम्, वृत्तिसंवादः (Employment news) प्रभृति पत्रिकातः व्यावसायिकतथ्यानि प्राप्तुं शक्यते।

व्यावसायिकतथ्यसंग्रहणस्य कृते महान् स्रोतः भवति अन्तर्जालम् (Internet)। इदानीं प्रत्येकं संस्थायाः 'वेवसाइट' (Website) इति अस्ति। यत्र संस्थया विविधतथ्यानि दीयते। अनेनोपायेन व्यावसायिकतथ्यानि प्राप्यते।

व्यावसाये नियुक्त-अभिज्ञ-व्यक्तिः (Experienced Person) यः व्यावसासम्बन्धीय-विविधतथ्यानि यथा-योग्यता, पारिश्रमिकः, पदोन्नतिः, व्यावसाये विपदः आशङ्का इत्यादय प्रददाति।

स्नातकस्तरे व्यवसायिकनिर्देशनस्य महत्वम्

साम्प्रतं महती उद्योगसमस्या सर्वत्र दरीदृश्यते। सर्वे चिन्तयन्ति यत् आत्मनः भविष्यजीवनं कथञ्चित् सुन्दरं सुखमयं च स्यात्। तदर्थं सुयोग्यनिर्देशनस्य अपेक्षा वर्तते। सुयोग्यनिर्देशनम् अतीव कुशल-परिपक्व-योग्यव्यक्तीनां कार्यम्। आधुनिकयुगे बहवः जनाः शिक्षिताः सन्तोऽपि आजीविका प्राप्तये असमर्थाः दरीदृश्यन्ते। समाजस्य औद्योगिकसंस्थानाञ्च आवश्यकतानां पूर्तये अशक्ताः भवन्ति। शैक्षिकसंस्थासु छात्रेभ्यः विभिन्न-व्यवसायानां ज्ञानप्रदानम्, आत्मनः सामर्थ्यानुसारं योग्यव्यवसायचयनम्, चितव्यवसायाय योग्यप्रशिक्षणप्रदानम् इत्यादिकार्येषु क्रियमाणसाहाय्यम् उक्तसमस्यानां समाधानाय मार्गं भवितुमर्हति। इदमेव कार्यं व्यवसायिकनिर्देशनत्वेन परिभाष्यते।

जनविस्फोटः, सर्वकारस्य जीविकां प्रति यथार्थचिन्तनस्य अभावः, अवैज्ञानिकी शिक्षाव्यवस्था, यथार्थनिर्देशकस्य अभावः, यथार्थव्यवसायिकनिर्देशनस्य अभावः जीविकासमस्यायाः कारणम्। एतादृशी समस्या निराकरणाय व्यवसायिकनिर्देशनस्य अपेक्षा वर्तते। सर्वादौ व्यवसायिकविषये सम्यक् धारणानिर्माणाय शिक्षार्थीभ्यः साहाय्यप्रदानं करणीयम्।उद्योगप्रार्थीणां संख्याधिक्यं दृश्यते। परन्तु उद्यागसंख्या अतीव न्युनमस्ति। कदाचिद् कस्मिंश्चित् क्षेत्रे तु योग्यप्रार्थी नैव प्राप्यते। अतः कुत्र जीविकायाः अभावः दृश्यते, अभावस्य प्रकृतिः कीदृशी, तस्याः जीविकायाः कृते कीदृशं प्रशिक्षणमावश्यकम्, प्रशिक्षणस्य सौविध्यं कुत्र अस्ति प्रभृति तथ्यानि शिक्षार्थिनः अभिभावकानां च वदनीयम्।

स्नातकतरे सामान्यशिक्षया सह व्यवसायिकशिक्षायाः अवकाशः दद्याद्। जीविकाविषये सम्यकरूपेण विचिन्त्य स्नातकस्तरे 'वोकेशनल कोर्स' उद्घाटनीयम्। अनेन जीविकासमस्या दूरीभूता भवति। अस्मिन् क्षेत्रे शिल्पपतीनां परामर्शः अवश्यं ग्रहणीयम्।

अधुना इउ जी सी इति संस्था स्नातकस्तरे व्यवसायिकविषयाः पाठक्रमे संयोजनीयाः। एतदर्थं विश्वविद्यालयान् प्रति अनुदानस्य व्यवस्था ग्रहणीया। परन्तु विश्वविद्यालयानां स्थितिः, यथार्थशिक्षकानामभावः दृश्यते। अतः एषा व्यवस्था व्यर्थमभवत्।

प्रशिक्षणसमये प्रशिक्षणकेन्द्रस्य मान्यता अस्ति न वा तद्विषये अवगम्य प्रशिक्षणं ग्रहणीयम्। अस्मिन् क्षेत्रे अर्न्तजालस्य प्रयोगं करणीयम्। व्यवसायिकतथ्यानां कृते ग्रन्थागारः, संवादपत्रम्, बुलेटिन, वेतारः, दूरदर्शनम्, अर्न्तजालप्रभृति गणमाध्यमस्य प्रयोगं करणीयम्।

[3]. निर्देशना एवं परामर्शदान (Guidance and Counselling)- मुखोपाध्याय काकलि, कलकता,२०१६

अनेन स्नातककक्षाया: शिक्षार्थिन: व्यवसाचयने यथार्थदिशां प्राप्नुवन्ति। व्यवसायिकनिर्देशनेन वाञ्छितव्यवसाये प्रवेशनानन्तरं व्यवसायिकसमायोजनेऽपि साहाय्यं क्रियते। व्यवसायिकनिर्देशनेन व्यक्तिः सन्तोषेन कार्यं कुर्वन् आत्मनः, समाजस्य, देशस्य च आर्थिकविकासे करणीभूत: भवति। इत्थं निर्देशनं समयस्य, धनस्य, श्रमस्य च अपव्यय निवारयति। अन्यथा भविष्यकाले शिक्षार्थिन: शनैः शनैः हताशाग्रस्ता:, निष्क्रियाः च भविष्यन्ति एवञ्च असामाजिककार्यानि कुर्वन्ति। सामाजिकसन्तुलनं विनष्टं भविष्यति। देशस्य उन्नतौ प्रतिबन्धकता आगमिष्यति।

**सहायकग्रन्थाः**


1. रेड्डी, नागमुनि पि.- शिक्षामनोविज्ञानम् (२००८)।
2. पाठक पी.डी. शिक्षामनोविज्ञान - Vinod Pustak Mandir, Agra-2005.
3. डॉ. पाल देवाशीष - निर्देशनं परामर्शच - रीता पब्लिकेशनस्।
4. डॉ. दे रणजित् - शिक्षायां व्यवसाये च निर्देशनम्।
5. Kochhar, S.K. - Guidance and Counselling in Collage and Univer-sities, New Delhi : Sterling Publishers.
6. Sharma Ramanath, Sharma Rachana, Guidance and Counselling in India-Atiantic Publishers. (&) Agarwal J.C - Educational Vocational Guidance and Coun-selling- Doaba House Publishers, 1987.